# काली कवचम्

भैरव्युवाच

काली पूजाश्रुतानाथ भावाश्च विविधा प्रभो। इदानीं श्रोतुमिच्छामि कवचं पूर्व सूचितम्।।1।।
त्वमेव सृष्टापाता च संहर्ता च त्वमेव च। त्वमेव शरणं नाथ त्राहि मां दु:ख संकटात्।।2।।

भैरवोवाच

रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे। श्रीजगन्मंगलं नाम कवचं मंत्र-विग्रहम्।।3।।
पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत् क्षणात्। नारायणोपि यद्धृत्वा नारी भूत्वा महेश्वरम्।।4।।
योगिनं क्षोभमनयद् यद्धृत्वा च रघूत्तम:। वर तृप्तो जघानैव रावणादि निशाचरान्।।5।।
यस्य प्रसादादीशोहं त्रैलोक्य विजयी विभु:। धनाधिप: कुबेरोपि सुरेशोभूच्छचीपति:।।6।।
एवं सकला देवा: सर्व सिद्धिश्वरा: प्रिये। श्री जगन्मंगलस्यास्य कवचस्य ऋषि: शिव:।।7।।
छन्दोनुष्टुप् देवता च कालिका दक्षिणेरिता। जगतां मोहने दुष्ट विजये भुक्ति-मुक्तिषु।।8।।
योषिदाकर्षणे चैव विनियोग: प्रकीर्तित:। शिरो मे कालिका पातु क्रींकारैकाक्षरीपरा।।9।।
क्रीं क्रीं क्रीं मे ललाटं च कालिका खड्गधारिणी। हूं हूं पातु नेत्रयुगं ह्रीं ह्रीं पातु श्रुती मम्।।10।।
दक्षिणे कालिका पातु घ्राणयुग्मं महेश्वरी। क्रीं क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकम्।।11।।
वदनं सकलं पातु ह्रीं ह्रीं स्वाहा स्वरूपिणी। द्वाविंशत्यक्षरी स्कन्धौ महाविद्या सुखप्रदा।।12।।
खड्ग मुण्डधराकाली सर्वांगामभितोवतु। क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुण्डा हृदये मम।।13।।
ऐं हूं ओं ऐं स्तनद्वन्द्वं ह्रीं फट् स्वाहा ककुस्थलम्। अष्टाक्षरी महाविद्या भुजौ पातु सकर्तृका।।14।।
क्रीं क्रीं हूं हूं ह्रीं ह्रींकारी पातु षडक्षरी मम्। क्रीं नाभिं मध्यदेशं च दक्षिणे कालिकावतु।।15।।
क्रीं स्वाहा पातु पृष्ठं च कालिका सा दशक्षरी। क्रीं मे गुह्यं सदा पातु कालिकायै नमस्तत:।।16।।
सप्ताक्षरी महाविद्या सर्वतन्त्रेषु गोपिता। ह्रीं ह्रीं दक्षिणे कालिके हूं हूं पातु कटिद्वयम्।।17।।
काली दशाक्षरी विद्या स्वाहा ममूरुयुग्मकम्। ॐ क्रीं क्रीं मे स्वाहा पातु कालिका जानुनी सदा।।18।।
कालीहन्नामविद्येयं चतुर्वर्ग फलप्रदा। क्रीं ह्रीं ह्रीं पातु सा गुल्फं दक्षिणे कालिकावतु।।19।।
क्रीं हूं ह्रीं स्वाहा पदं पातु चतुर्दशाक्षरी मम। खड्गमुंडधराकाली वरदाभय धारिणी।।20।।
विद्याभि: सकलाभि: सा सर्वांगमभितोवतु। काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी।।21।।
विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषा। नीला घना बलाका च मात्रा मुद्रा मिता च माम्।।22।।
एता: सर्वा: खड्गधरा मुण्डमाला विभूषणा:। रक्षन्तु दिग्-विदिक्षु मां ब्राह्मी नारायणी तथा।।23।।
माहेश्वरी च चामुण्डा कौमारी चापराजिता। वाराही नारसिंही च सर्वाश्चामितभूषणा:।।24।।
रक्षन्तु स्वायुधैर्दिक्षु विदिक्षु मां यथा तथा। इति ते कथितं दिव्यं कवचं परमाद्भुतं।।25।।
श्री जगन्मंगलंनाम महाविद्यौघ विग्रहम्। त्रैलोक्याकर्षणं ब्रह्मन् कवचं मुन्मुखोदितम्।।26।।
गुरुपूजां विधायाथ विधिवत् पठेत्तत:। कवचं त्रिसकृद वापि यावज्जीवं च वा पुन:।।27।।
एतच्छताद्धमावृत्य त्रैलोक्य विजयी भवेत्। त्रैलाक्यं क्षोभयत्येव कवचस्य प्रसादत:।।28।।
महाकविर्भवेन्मासं सर्वसिद्धिश्वरो भवेत्। पुष्पांजलीं कालिकायै मूलेनैवार्पयेत् सकृत।।29।।
शतवर्ष सहस्त्राणां पूजाया: फलमाप्नुयात्। भुर्जे विलिखितं चैतत्स्वर्णस्थं धारयेत् यदि।।30।।
विशाखायां दक्षबाहौ कण्ठे वा धारयेद् यदि। त्रैलौक्यं मोहयेत् क्रोधात् त्रैलोक्यं चूर्णयेत् क्षणात्।।31।।
पुत्रवान् धनवान् श्रीमान् नानाविद्याविधिर्भवेत्। ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रस्पर्शनात्तत:।।32।।
नाशमायाति या नारी वन्ध्या वा मृतपुत्रिणी। बह्वपत्या जीवतोका भवत्येव न संशय:।।33।।
न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषत:। शिष्येभ्यो भक्तियुक्तेभ्यो ह्यन्यथा मृत्युमाप्नुयात्।।34।।
स्पर्द्धामुद्धय कमला वाग्देवी मन्दिरे सुखे। पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितम्।।35।।
इदं कवचमज्ञात्वा यो भजेद् घोरदक्षिणाम्। शतलक्षं प्रजप्त्वापि तस्य विद्या न सिद्धयति।।
सहस्त्रघातमाप्नोति सोचिरान्मृत्युमाप्नुयात्।।36।।

------- शिवा-शिव समूह , दिल्ली

# कालिका कवचम्

कैलासशिखरासीनं देव-देवं जगद्गुरुम्। शंकरं परिप्रच्छ पार्वती परमेश्वरम्।।1।।

पार्वत्युवाच

भगवन् देवदेवेश! देवानां भोगद प्रभो!। प्रब्रूहि मे महादेव! गोप्यं चेद् यदि हे प्रभो।।2।।
शत्रूणां येन नाश: स्यादात्मनो रक्षणं भवेत्। परमैश्वर्यमतुलं लभेद् येन हि तद् वद?।।3।।

भैरव उवाच

वक्ष्यामि ते महादेवि! सर्वधर्मविदां वरे। अद्भुतं कवचं देव्या: सर्वकामप्रसाधकम्।।4।।
विशेषत: शत्रुनाशं सर्वरक्षाकरं नृणाम्। सर्वारिष्टप्रशमनं सर्वाभद्र-विनाशनम्।।5।।
सुखदं भोगदं चैव वशीकरणमुत्तमम्। शत्रुसंघा: क्षयं यान्ति भवन्ति व्याधिपीडिता:।।6।।
दु:खिनो ज्वरिणश्चैव स्वाभीष्ट-द्रोहिणस्तथा। भोग-मोक्षप्रदं चैव कालिकाकवचं पठेत्।।7।।
विनियोग:- ॐ अस्य श्रीकालिकाकवचस्य भैरव ऋषि:, अनुष्टुप् छन्द:, श्रीकालिका देवता, शत्रुसंहारार्थं जपे विनियोग:।

ध्यानम्

ध्यायेत् कालीं महामायां त्रिनेत्रां बहुरूपिणीम्। चतुर्भुजां ललज्जिह्वां पूर्णचन्द्रनिभाननाम्।।8।।
नीलोत्पलदलश्यामां शत्रुसंघविदारिणीम्। नरमुण्डं तथा खड्गं कमलं च वरं तथा।।9।।
निर्भयां रक्तवदनां दंष्ट्रालीघोररूपिणीम्। साट्टहासाननां देवीं सर्वदा च दिगम्बरीम्।।10।।
शवासनस्थितां कालीं मुण्डमालाविभूषिताम्। इति ध्यात्वा महाकालीं ततस्तु कवचं पठेत्।।11।।

कवचम्

ॐ कालिका घोररूपा सर्वकामप्रदा शुभा। सर्वदेवस्तुता देवी शत्रुनाशं करोतु मे।।12।।
ॐ ह्रीं ह्रींरूपिणीं चैव ह्रांह्रींह्रांरूपिणीं तथा। ह्रां ह्रीं क्षों क्षौंस्वरूपा सा सदा शत्रून् विदारयेत्।।13।।
श्रीं ह्रीं ऐंरूपिणी देवी भवबन्धविमोचिनी। हुँ रूपिणी महाकाली रक्षास्मान् देवि सर्वदा।।14।।
यया शुम्भो हतो दैत्यो निशुम्भश्च महासुर:। वैरिनाशाय वन्दे तां कालिकां शंकर-प्रियाम्।।15।।
ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहिका। कौमार्यैन्द्री च चामुण्डा खादन्तु मम विद्विष:।।16।।
सुरेश्वरी घोररूपा चण्ड-मुण्ड-विनाशिनी। मुण्डमालावृतांगी च सर्वत: पातु मां सदा।।17।।
ह्रीं ह्रीं ह्रीं कालिके घोरे दंष्ट्र व रुधिरप्रिये। रुधिरापूर्णवक्त्रे च रुधिरेणावृतस्तनि।।18।।
'मम शत्रून् खादय खादय हिंस हिंस मारय मारय भिन्धि भिन्धि छिन्धि छिन्धि उच्चाटय उच्चाटय द्रावय द्रावय शोषय शोषय स्वाहा। ह्रां ह्रीं कालिकायै मदीयशत्रून् समर्पयामि स्वाहा।
ॐ जय जय किरि किरि किटि किटि कट कट मर्द मर्द मोहय मोहय हर हर मम रिपून् ध्वंस ध्वंस भक्षय भक्षय त्रोटय त्रोटय यातुधानान् चामुण्डे सर्वजनान् राज्ञो राजपुरुषान् स्त्रियो मम वश्यान् कुरु कुरु तनु तनु धान्यं धनं मेऽश्वान् गजान् रत्नानि दिव्यकामिनी: पुत्रान् राजश्रियं देहि यच्छ क्षां क्षीं क्षूं क्षैं क्षौं क्ष: स्वाहा।
इत्येतत् कवचं दिव्यं कथितं शम्भुना पुरा। ये पठन्ति सदा तेषां ध्रुवं नश्यन्ति शत्रव:।।19।।
वैरिण: प्रलयं यान्ति व्याधिता वा भवन्ति हि। बलहीना: पुत्रहीना: शत्रवस्तस्य सर्वदा।।20।।
सहस्त्रपठनात् सिद्धि: कवचस्य भवेत्तदा। तत् कार्याणि च सिद्ध्यन्ति यथा शंकरभाषितम्।।21।।
श्मशानांगारमादाय चूर्ण कृत्वा प्रयत्नत:। पादोदकेन पिष्ट्वा तल्लिखेल्लोहशलाकया।।22।।
भूमौ शत्रून् हीनरूपानुत्तराशिरसस्तथा। हस्तं दत्त्वा तु हृदये कवचं तु स्वयं पठेत्।।23।।
शत्रो: प्राणप्रतिष्ठां तु कुर्यान् मन्त्रेण मन्त्रवित्। हन्यादस्त्रं प्रहारेण शत्रो गच्छ यमक्षयम्।।24।।
ज्वलदंगारतापेन भवन्ति ज्वरिता भृशम्। प्रोञ्छनैर्वामपादेन दरिद्रो भवति ध्रुवम्।।25।।
वैरिनाशकरं प्रोक्तं कवचं वश्यकारकम्। परमैश्वर्यदं चैव पुत्र-पौत्रादिवृद्धिदम्।।26।।
प्रभातसमये चैव पूजाकाले च यत्नत:। सायंकाले तथा पाठात् सर्वसिद्धिर्भवेद् ध्रुवम्।।27।।
शत्रूरुच्चाटनं याति देशाद् वा विच्युतो भवेत्। पश्चात् किंकरतामेति सत्यं-सत्यं न संशय:।।28।।
शत्रुनाशकरे देवि! सर्वसम्पत्करे शुभे!। सर्वदेवस्तुते देवि कालिके! त्वां नमाम्यहम्।।29।।

------- शिवा-शिव समूह , दिल्ली

# ॥ आद्या स्तोत्रम् ॥

ॐ नम: आद्यायै।

शृणु वत्स प्रवक्ष्यामि आद्या स्तोत्रं महाफलम्। य: पठेत् सततं भक्त्या स एव विष्णुवल्लभ:॥1॥
मृत्युर्व्याधिभयं तस्य नास्ति किञ्चित् कलौ युगे। अपुत्रा लभते पुत्रं त्रिपक्षं श्रवणं यदि॥2॥
द्वौ मासौ बन्धनान्मुक्ति विप्रर्वक्त्रात् श्रुतं यदि। मृतवत्सा जीववत्सा षण्मासं श्रवणं यदि॥3॥
नौकायां संकटे युद्धे पठनाज्जयमाप्नुयात्। लिखित्वा स्थापयेद्गेहे नाग्निचौरभयं क्वचित्॥4॥
राजस्थाने जयी नित्यं प्रसन्ना: सर्वदेवता। ॐ ह्रीं ब्रह्माणी ब्रह्मलोके च वैकुण्ठे सर्वमंगला॥5॥
इन्द्राणी अमरावत्यामविका वरुणालये। यमालये मालरूपा कुबेरभवने शुभा॥6॥
महानन्दाग्निकोने च वयव्यां मृगवाहिनी। नैऋत्यां रक्तदन्ता च ऐशन्यां शूलधारिणी॥7॥
पाताले वैष्णवीरूपा सिंहले देवमोहिनी। सुरसा च मणीद्विपे लंकायां भद्रकालिका॥8॥
रामेश्वरी सेतुबन्धे विमला पुरुषोत्तमे। विरजा औंगदेशे च कामाक्ष्या नीलपर्वते॥9॥
कालिका वंगदेशे च अयोध्यायां महेश्वरी। वाराणस्यामन्नपूर्णा गयाक्षेत्रे गयेश्वरी॥10॥
कुरुक्षेत्रे भद्रकाली व्रजे कात्यायनी परा। द्वारकायां महामाया मथुरायां माहेश्वरी॥11॥
क्षुधा त्वं सर्वभूतानां वेला त्वं सागरस्य च। नवमी शुक्लपक्षस्य कृष्णसैकादशी परा॥12॥
दक्षसा दुहिता देवी दक्षयज्ञ विनाशिनी। रामस्य जानकी त्वं हि रावणध्वंसकारिणी॥13॥
चण्डमुण्डवधे देवी रक्तबीजविनाशिनी। निशुम्भशुम्भमथिनी मधुकैटभघातिनी॥14॥
विष्णुभक्तिप्रदा दुर्गा सुखदा मोक्षदा सदा। आद्यास्तवमिमं पुण्यं य: पठेत् सततं नर:॥15॥
सर्वज्वरभयं न स्यात् सर्वव्याधिविनाशनम्। कोटितीर्थफलं तस्य लभते नात्र संशय:॥16॥
जया मे चाग्रत: पातु विजया पातु पृष्ठत:। नारायणी शीर्षदेशे सर्वांगे सिंहवाहिनी॥17॥
शिवदूती उग्रचण्डा प्रत्यंगे परमेश्वरी। विशालाक्षी महामाया कौमारी संगिनी शिवा॥18॥
चक्रिणी जयधात्री च रणमत्ता रणप्रिया। दुर्गा जयन्ती काली च भद्रकाली महोदरी॥19॥
नारसिंही च वाराही सिद्धिदात्री सुखप्रदा। भयंकरी महारौद्री महाभयविनाशिनी॥20॥

इति ब्रह्मयामले ब्रह्मनारदसंवादे आद्या स्तोत्रं समाप्तम्॥

॥ ॐ नम: आद्यायै, ॐ नम: आद्यायै, ॐ नम: आद्यायै ॥

------- शिवा-शिव समूह, दिल्ली

# कालिकाष्टकम्

गलद्-रक्तमुण्डावली कण्ठमाला, महाघोररावा सुदंष्ट्राकराला।
विवस्त्रा श्मशानालया मुक्तकेशी, महाकाल-कामाकुलाकालिकेयम्॥1॥
भुजेवाग्युग्मेशिरोऽसी दधाना, वरं दक्षयुग्मेऽभयं वै तथैव।
सुमध्याऽपितुंगस्तनाभारनम्रा, लसद्रक्तसृक्कद्वया सुस्मितास्या॥2॥
शवद्वन्द्वकर्णावतंसा सुकेशी लसत्प्रेतपाणि-प्रयुक्तैक-कांची।
शवाकार-मंचाधिरुढ़ाशिवाभिश्चतुर्दिक्षु शब्दायमानाऽभिरेजे॥3॥
विरंच्यादिदेवास्त्रयस्ते गुणांस्त्रीन्, समाराध्यकालि प्रधाना बभूव:।
अनादिं सुरादिं मखादिं भवादिं, स्वरुपं त्वदीयं न विन्दन्ति देवा:॥4॥
जगन्मोहनीयं तु वाग्वादिनीयं, सुहृत् पोषिणीं शत्रुसंहारणीयम्।
वच: स्तम्भनीयं किमुच्चाटनीयं, स्वरूपं त्वदीयं न विन्दन्ति देवा:॥5॥
इयं स्वर्गदात्री पुन: कल्पवल्ली, मनोजांस्तु कामान् यथार्थं प्रकुर्यात्।
कथा ते कृतार्था भवन्तीति नित्यं, स्वरूपं त्वदीयं न विन्दन्ति देवा:॥6॥
सुरापानमत्ते! सुभक्तानुरक्ते!, लसत् पूतचित्ते! सदाविर्भवस्ते।
जप-ध्यान-पूजा-सुधाधौतपंका:, स्वरूपं त्वदीयं न विन्दन्ति देवा:॥7॥
चिदानन्द-कन्दं हसन् मन्दमन्दं, शरच्चन्द्रकोटि-प्रभापुंज-बिम्बम्।
मुनीनां कवीनां हृदि द्योतमानं, स्वरुपं त्वदीयं न विन्दन्ति देवा:॥8॥
महा-मेघ-काली सुरक्ताऽपि शुभ्रा, कदाचिद् विचित्राकृतिर्योगमाया।
न बाला न वृद्धा न कामात्तुराऽपि, स्वरूपं त्वदीयं न विन्दन्ति देवा:॥9॥
क्षमस्वापराधं महागुप्तभावं, मया लोकमध्ये प्रकाशीकृतं यत्।
तव ध्यानपूतेन चापल्य-भावात्, स्वरूपं त्वदीयं न विन्दन्ति देवा:॥10॥

फलश्रुति:

यदि ध्यानयुक्त: पठेद् यो मनुष्यस्तदा सर्वलोके विशालो भवेच्च।
गृहे चाऽष्टसिद्धिर्मृते चापि मुक्ति:, स्वरूपं त्वदीयं न विन्दन्ति देवा:॥11॥

------- शिवा-शिव समूह, दिल्ली

अष्टोत्तरशतनामावली

1. काली
2. कपालिनी
3. कान्ता
4. कामदा
5. कामसुंदरी
6. कालरात्री
7. कालिका
8. कालभैरवपूजिता
9. कुरुकुल्ला
10. कामिनी
11. कमनीयस्वभाविनी
12. कुलीना
13. कुलकर्त्री
14. कुलवर्त्मप्रकाशिनी
15. कस्तूरीरसनीला
16. काम्या
17. कामस्वरूपिणी
18. ककारवर्णनीलया
19. कामधेनु
20. करालिका
21. कुलकान्ता
22. करालास्या
23. कामार्त्ता
24. कलावती
25. कृशोदरी
26. कामाख्या
27. कौमारी
28. कुलपालिनी
29. कुलजा
30. कुलकन्या
31. कलहा
32. कुलपूजिता
33. कामेश्वरी
34. कामकान्ता
35. कुब्जेश्वरगामिनी
36. कामदात्री
37. कामहर्त्री
38. कृष्णा
39. कपर्दिनी
40. कुमुदा
41. कृष्णदेहा
42. कालिन्दी
43. कुलपूजिता
44. काश्यपि
45. कृष्णमाता
46. कुलिशांगी
47. कला
48. क्रींरूपा
49. कुलगम्या
50. कमला
51. कृष्णपूजिता
52. कृशांगी
53. कन्नरी
54. कर्त्री
55. कलकण्ठी
56. कार्तिकी
57. काम्बुकण्ठी
58. कौलिनी
59. कुमुदा
60. कामजीविनी
61. कुलस्त्री
62. कार्तिकी
63. कृत्या
64. कीर्ति
65. कुलपालिका
66. कामदेवकला
67. कल्पलता
68. कामांगबद्धिनी
69. कुन्ती
70. कुमुदप्रिया
71. कदम्बकुसुमोत्सुका
72. कादम्बिनी
73. कमलिनी
74. कृष्णानंदप्रदायिनी
75. कुमारीपूजनरता
76. कुमारीगणशोभिता
77. कुमारीरंश्चरता
78. कुमारीव्रतधारिणी
79. कंकाली
80. कमनीया
81. कामशास्त्रविशारदा
82. कपालखड्वांगधरा
83. कालभैरवरूपिणि
84. कोटरी
85. कोटराक्षी
86. काशी
87. कैलाशवासिनी
88. कात्यायिनी
89. कार्यकरी
90. काव्यशास्त्रप्रमोदिनी
91. कामाकर्षणरूपा
92. कामपीठनिवासिनी
93. कंकिनी
94. काकिनी
95. क्रीड़ा
96. कुत्सिता
97. कलहप्रिया
98. कुण्डगोलोद्भवाप्राणा
99. कौशिकी
100. कीर्तीवर्धिनी
101. कुम्भस्तिनी
102. कटाक्षा
103. काव्या
104. कोकनदप्रिया
105. कान्तारवासिनी
106. कान्ति
107. कठिना
108. कृष्णवल्लभा

....................